कुल प्रश्नों की संख्या : 42
Total No. of Questions: 42

कुल पृष्ठों की संख्या : 08
Total No. of Pages: 08

# हाई स्कूल परीक्षा, दिसम्बर – 2019

## 209

## विषय : संस्कृत

## Subject : SANSKRIT

समय : 03 घण्टे
Time: 03 Hours

पूर्णांक : 100
Maximum Marks: 100

---

*निर्देशः–*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 का मनुष्याणां देवता? (1)

(क) पिता (ख) माता

(ग) भ्राता (घ) भगिनी

प्र.2 शूलपाणिः इति कः कथ्यते? (1)

(क) विष्णुः (ख) इन्द्रः

(ग) शिवः (घ) सूर्यः

प्र.3 अर्थशास्त्रं केन रचितम्? (1)

(क) सचिवेन (ख) कौटिल्येन

(ग) द्वार पालेन (घ) भास्कराचार्येण

प्र.4 धर्मः केन रक्ष्येत्? (1)

(क) सत्येन (ख) योगेन

(ग) वृत्तेन (घ) यत्नेन



mpcareer.in

प्र.5 दिनस्य अन्ते रात्रौ किं पिबेत्? (1)

(क) पयः (ख) तक्रं

(ग) वारि (घ) घृतं

प्र.6 समस्तसैन्यदलम् अपि कस्य समक्षं योद्धुम् पर्याप्तं नासीत्? (1)

(क) भरतस्य (ख) रामस्य

(ग) लक्ष्मणस्य (घ) लवस्यं

प्र.7 'आपत्सु' अत्र का विभक्तिः? (1)

(क) सप्तमी (ख) प्रथमा

(ग) षष्ठी (घ) द्वितीया

प्र.8 एतत् अव्ययं नास्ति – (1)

(क) यद्यपि (ख) प्रभूतम्

(ग) सह (घ) सर्वतः

प्र.9 'वदन्तः' इति पदे प्रत्ययः अस्ति – (1)

(क) क्तवतु (ख) क्त

(ग) क्त्वा (घ) शतृ

प्र.10 अधोलिखितेषु उपसर्गः नास्ति – (1)

(क) परा (ख) धरा

(ग) अप (घ) प्र

प्र.11 "अहं तु तरणे असमर्थः" इति कथनं कः कं प्रति कथयति? (2)

प्र.12 'मातुराज्ञा गरीयसी' पाठोऽयम् कस्मात् नाटकात् संकलितः? कश्च तस्य नाटककारः? (2)

प्र.13 कोष्ठकात् समुचित पदं चित्वा रिक्त स्थानं पूर्ति कुरुत – (2)

(क) मम माता माम् एकं मानुषम् आनेतुम् ........................................। (आदिशत्/आदिशन्)

(ख) एकदा सेवकस्य हस्तात् फलं भूमौ.................................................................। (अपतन्/अपतत्)



mpcareer.in

प्र.14 अधोलिखित पद्यस्य अन्वये रिक्त स्थानानि पूरयत – (2)

प्रत्युवा च मुनिः पूर्णमेघगम्भीरया गिरा।

जानीत भारतं वर्ष, विशिष्टं जगतः कथम्।।

मुनिः पूर्ण ................गम्भीरया ....................प्रत्युवा च।

......................वर्ष जगतः........................कथम् जानीत।

प्र.15 गदर्भः किं किं करोति इति वाक्यद्वये लिखत। (2)

प्र.16 संस्कृतस्य द्वयोः गद्यकारयोः नाम लिखत। (2)

प्र.17 एकं अशुद्धं कथनं (X) इति चिन्हेन चिन्हितं कुरुत – (2)

(क) आर्हतानां तु विनयमूलमेव धर्मः।

(ख) चन्द्रकेतोः सेना गजतुरगपदातियुक्ता आसीत्।

(ग) शंकरः लौकिकः आसीत्।

(घ) सूर्योदयात् पूर्वम् उत्तिष्ठेत्।

प्र.18 रिक्त स्थानानि पूरयित्वा श्लोक निर्माणं कुरुत – (2)

क्षमा...........................करे यस्य ...........................किं करिष्यति।

...............................पतितो...............................स्वयमेवोपशाम्यति।।

प्र.19 अधोलिखित वर्णानां समुचित उच्चारण स्थानं कोष्ठकात् चित्वा लिखत – (2)

(क) प (तालु / ओष्ठौ)

(ख) च (कण्ठः / तालु)

प्र.20 निम्नलिखितेषु द्वयोः पदयोः सन्धिविच्छेदं कृत्वा सन्धि नाम लिखत – (2)

(क) वागीशः

(ख) परोपकारः

(ग) मनोरथः



mpcareer.in

प्र.21 अधोलिखित शब्देशु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(क) मनस् – तृतीया विभक्तिः

(ख) रामः – षष्ठी विभक्तिः

(ग) युष्मद् – द्वितीया विभक्तिः

प्र.22 अधोलिखित पदस्य विभक्तिं वचनं च लिखत – (2)

'मया' अथवा 'कस्मात्'

प्र.23 अधोलिखितेषु पदद्वयस्य प्रकृति प्रत्ययं च पृथक कुरुत – (2)

(क) कर्तव्यः (ख) पठितुम्

(ग) गत्वा (घ) प्रविश्य

प्र.24 अधोलिखितेषु धातुं प्रत्ययं च संयोज्य द्वयोः पदयोः निर्माण कुरुत – (2)

(क) हस् + शतृ (ख) वि + हस् + ल्यप्

(ग) गम + क्तवतु (घ) गम् + क्त

प्र.25 अधोलिखितेषु धातुषु द्वयोः धातुरूपाणि निर्देशानुसारं लिखत – (2)

(क) पठ् – लोट्लकार प्रथमपुरुष, एकवचन

(ख) हस् – लट्लकार उत्तमपुरुष, बहुवचन

(ग) गम् – लृट्लकार मध्यमपुरुष, एकवचन

प्र.26 अधोलिखितेषु वाक्येषु कोष्ठकात् उचित धातुपदैः रिक्तस्थानानि पूरयत – (2)

(क) बालकाः विद्यालयं (गच्छति/गच्छन्ति)

(ख) अहं रामेण सह (गमिष्यति/गमिष्यामि)

प्र.27 समासाधारितं युग्ममेलनं कुरुत – (2)

| | **(अ)** | | **(ब)** |
|---|---|---|---|
| (क) | पितरौ | – | अव्ययीभाव समासः |
| (ख) | यथाशक्तिः | – | तत्पुरुष समासः |
| (ग) | दीनदानम् | – | द्विगु समासः |
| (घ) | त्रिलोकः | – | द्वन्द्व समासः |



mpcareer.in

प्र.28 अधोलिखितेषु द्वयोः पदयोः विग्रहं कृत्वा समास नामानि लिखत – (2)

(क) आहारवेला (ख) नीलकमलम्

(ग) हरिहरौ (घ) चन्द्रशेखरः

प्र.29 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

पुरा त्रिविक्रमसेनाख्यः एकः साहसी नृपः आसीत्। तस्य सभायां क्षान्तिशीलनामकः एकः भिक्षुकः प्रतिदिनम् आगत्य राज्ञे फलमेकं ददाति स्म। एवं बहूनि दिनानि व्यतीतानि। एकदा सेवकस्य हस्तात् फलं भूमौ अपतत्।

(क) त्रिविक्रमसेनः कीदृशः नृपः आसीत्?

(ख) नृपस्य सभायां कः प्रतिदिनम् आगच्छति स्म?

(ग) एकदा सेवकस्य हस्तात् कं भूमौ अपतत्?

प्र.30 अधोलिखितनाट्यांश पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

शकुन्तला – (सलज्जम्) तात! वन्दे।

कण्वः – वत्से! भर्तुः बहुमता भव। सम्राजं सुतम् आप्नुहि।

गौतमी – भगवन्! वरः खलु एषः न आशीः।

कण्वः – वत्से! इतः अग्निं प्रदक्षिणी कुरूष्व। एते बह्नयः दुरितम् अपघ्नन्तः त्वां पावयन्तु।

(क) शकुन्तला कं प्रणमति?

(ख) ''सम्राजं सुतम् आप्नुहि'' इति कः काम् कथयति?

(ग) 'वरः खलु एषः न आशीः' इति का कथयति?

प्र.31 सम्यक् सन्धिमेलनं कुरुत – (3)

| | (अ) | (ब) |
|---|---|---|
| (क) | प्रति + अवदन् | विद्वान्न |
| (ख) | मातुः + आज्ञाम् | प्रत्यवदन् |
| (ग) | विद्वान् + न | मातुराज्ञाम् |



mpcareer.in

प्र.32 रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कुरुत – (3)

(क) अस्माकं राक्षसात् मोक्षः नास्ति।

(ख) लीलावती भास्कराचार्यस्य पुत्री आसीत्।

(ग) बालकस्य हस्ते लेखनी अस्ति।

प्र.33 अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृत भाषायां एकपदेन लिखत – (3)

(क) त्रिपथगा नदी का उच्यते?

(ख) मनसा जनाः किं कुर्वन्ति?

(ग) वायोः अधिकं गतिशीलम् किमस्ति?

(घ) बोपदेवः कस्मिन् प्रदेशे वसति स्म?

(ङ) भास्कराचार्य विरचिता सर्वप्रसिद्धा कृतिः काऽस्ति?

प्र.34 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।

मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।

(क) रूपं कथं रक्ष्यते?

(ख) विद्या केन रक्ष्यते?

(ग) कुलं केन रक्ष्यते?

प्र.35 'आर्यभटीयम्' इति ग्रन्थस्य लेखकः कः? आर्यभटीये कति श्लोकाः कतिषु पादेषु विभक्ताः अस्ति। (3)

प्र.36 शुद्ध वाक्यानां समक्षम् 'आम' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (3)

(क) विना योगे द्वितीया, तृतीया, पञ्चमी वा विभक्तिः भवति।

(ख) सहयोगे पञ्चमी विभक्तिः भवति।

(ग) नमः, स्वाहा, योगे चतुर्थी विभक्तिः भवति।

mpcareer.in

प्र.37 अधोलिखितेषु एकस्य पात्रस्य चरित्र चित्रणं पञ्च वाक्येषु संस्कृत भाषायां लिखत – (5)

(क) बालगंगाधर तिलकः

(ख) लवः

(ग) शक्रः

प्र.38 स्वपाठ्यपुस्तकात् एकस्याः कथायाः सारं पञ्च वाक्येषु संस्कृत भाषायां लिखत। (5)

प्र.39 मञ्जूषात् पदानि चित्वा उपवनस्य महत्वं विषये पञ्च वाक्येषु एकम् अनुच्छेदं लिखत – (5)

(उपवनस्य, जनाः, भ्रमणम्, वृक्षाः, पादपः, कुर्वन्ति, सरोवरः, कमलानि, वातावरणम्, उपतिष्ठति)

प्र.40 स्वप्राचार्यस्य कृते अवकाशं प्राप्तयर्थम् आवेदन पत्रं लिखत। (5)

<u>अथवा</u>

स्वस्य मित्रस्य कृते तस्य जन्मदिवसोपलक्ष्ये मित्राय शुभकामना पत्रं संस्कृते लिखत।

प्र.41 अधोलिखितम् अपठितम् गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (5)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नाना विकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड्यन्ति, तेषांमूलम् अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) दुःखाना मूलकारणं किम्?

(ग) समाजे अनेके विकाराः कथं जायन्ते?


(घ) के उपद्रवाः अस्मान् पीड्यन्ति?

(ङ) अज्ञानस्य अंधकारं हर्तुं वयं किं कुर्याम?



mpcareer.in

प्र.42 प्रदत्त चित्रम् अवलोक्य पञ्चवाक्यानि रचयत – (5)



---------------------------

mpcareer.in